# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः – 29-01-2017 | अङ्काः–100
पूर्वाह्ने – 10-00 तः 1-00 पर्यन्तम् | समयः–घण्टात्रयम्

**1 एकेन वाक्येन उत्तरं लिखत :- (अष्टानाम्)** 8

1. कमलजदयिताष्टककर्ता कस्य पीठस्य अधिपः आसीत् ?
2. शिलागजः कस्य धारकः अभवत् ?
3. शिवलीलाः कति ?
4. विक्रमस्य रथस्य नाम किम् ?
5. शुकनासोपदेशगद्यस्य मूलग्रन्थः कः ?
6. 'प्रतापशील' इति प्रथितापरनामा राजा कः ?
7. यशोवत्याः प्रथमः पुत्रः कः ?
8. भारतसर्वकारः केन बिरुदा लक्ष्मणसूरिं सममानयत् ?
9. ''युधिष्ठिरस्य राजनीतिनैपुण्यम्'' मूलग्रन्थे कस्मिन् सर्गे अस्ति ?
10. कः उर्वशीं अशपत् ?
11. रामः केन वाहनेन वाल्मीकेः आश्रमम् आगच्छति ?
12. लक्ष्मीः इन्दुशकलात् काम् अगृह्णात् ?

**2 वाक्यद्वयेन षण्णाम् उत्तरं लिखत :-** 12

1. श्री अभिनवशङ्कराः कान् कान् देवान् अधिकृत्य स्तोत्राणि व्यरचयन् ?
2. भैरवाचार्यः कुत्र न्यवसत् ? तेन राज्ञे कानि प्रहितानि ?
3. मस्करिणं पुष्पभूतिः किं जगाद ?
4. भीष्मः काः स्वानुजाय आनयत् ? तासु ज्येष्ठा का ?
5. अप्सरसः उर्वशीं कथं वर्णयन्ति ?



पश्चादनुवर्तते

6. "किं भवान् तूष्णीम् आस्ते" इति राज्ञा पृष्टः माणवकः किमाह ?
7. रघुपतिं कुशः कथं वर्णयति ?
8. मातुः पादयोः पतित्वा नागः किं वदति ?

**3** **पञ्चैः वाक्यैः त्रयाणाम् उत्तरं लिखत ।** 9

1. सिद्धः स्वयोगशक्त्या किं किं चकार ?
2. पुष्पभूतिः वने काम् अपश्यत् ? सा किमुवाच ?
3. मात्रा समाश्वस्तः शान्तनवः तां किमूचे ?
4. लक्ष्म्या परिगृहीताः राजानः कथम् अविनयाधिष्ठानतां गच्छन्ति ?
5. मदस्य अनर्थहेतुत्वम् उपपादयत ।

**4** **त्रयाणां सप्रसङ्गं विवरणं कुरुत ।** 9

1. "भगवन्! आप्तकामा हि भवन्तः।"
2. "हरिदश्वः कमलाकरानिव ।"
3. "शतक्रतुना गन्धर्वसेना समाधिष्टा ।
4. "अयं च ते कालः प्रतापमारोपयितुम् ।"
5. "त्राये नैनं यदि ततः कः शरीरेण मे गुणः ।"

**5** **पद्यद्वयं पूर्णं लिखत ।** 6

1. शान्त्याद्याः .................................... मह्यम् ।।
2. कर्मस्वात्मोचितेषु .................................... मह्यम् ।।
3. शिवमौपयिकं .................................... जिगीषवः ।।

**6** **एकस्य पद्यस्य सान्वयम् अर्थं लिखत ।** 4

1. भसितं रसनासु निक्षिपन् कवयामास जडाननेकधा ।
   वितितार परां विरक्ततां विषयासङ्गमलीमसात्मनाम् ।।
2. म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
   तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ।

7 **एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत ।** 4

1. नीलकण्ठदीक्षितः 2. भारविः

8 **चतुर्णां रूपाणि परिचाययत ।** 4

1. वेधाः 2. प्रभया 3. विलिख्य
4. लेभिरे 5. अंशुमता 6. मरुतां

9 **चत्वारि पदानि वाक्ये योजयत ।** 4

1. विविक्ते 2. प्राचेतसः 3. शतक्रतुना
4. ब्रूहि 5. अन्तरालम् 6. समवलोक्य

10 **चतुर्णां पर्यायपदानि लिखत ।** 4

1. आगमः 2. आपगा 3. रयः
4. कैवर्तः 5. कुम्भीलकः 6. रोधः

11 **चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत ।** 6

1. चारणेभ्यस्त्वदीयम् 2. आह्वयायुष्मन्तम् 3. भ्रातरावावाम्
4. लवणाम्बुराशौ 5. अयमसौ 6. प्रोवाच

12 **चतुर्णाम् एकं पदं लिखत ।** 4

1. तरुणतृणविशेषः 2. करुणारहितः 3. धनुर्मध्यम्
4. क्षत्रियाधमः 5. मुखेभवं 6. गन्तुमिच्छुः

13 **चतुर्णां व्याकरणविशेषं लिखत ।** 8

1. विनयन्ते 2. लोकमधितिष्ठति 3. रोषमयम्
4. सन्तमसम् 5. अलमस्मै 6. विजयस्व



पश्चादनुवर्तते

**14** **चतुर्णां विग्रहवाक्यानि विलिख्य समासनाम लिखत ।** 8

1. सुरभारतीसेवा 2. कुरुपाण्डवकथा 3. महिमान्वितम्
4. दशरात्रम् 5. नगरान्तरम् 6. अनङ्गनवर्तिसाध्यम्

**15** **द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत ।** 6

1. शक्यते 2. चचाल 3. उपेक्षेत
4. प्राह 5. वर्तताम् 6. अवततार

**16** **रिक्तस्थानं पूरयत । (चतुर्णाम्)** 4

1. ................................ ह्यविनीतसम्पदः।
2. सरभसमेहि ........................... परिष्वजस्व ।
3. नैवमुपरोधः किन्तु .......................... अयं महान् ।
4 प्रियानाशे कृत्स्नं जगत् ........................... हि भवति ।
5. उपमा - कालिदासस्य, भारवेः - .........................।

* * * * *

# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## प्रवेशपरीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – 29-01-2017 | अङ्काः–50

अपराह्णे – 1-30 तः 3-00 पर्यन्तम् | समयः–सार्धैकहोरा

**1 विषयद्वयं विवृणुत ।** 10

1. सन्नन्तधातुरुपाणि सोदाहरणं विवृणुत ।
2. अष्टमगणविकरणप्रत्ययः कः? अष्टमगणक्रियापदस्य लट् तथा लङ् रूपाणि लिखत।
3. कति लकाराः सन्ति? तेषां नाम लिखत। आत्मनेपदि लोट् लकारस्य प्रत्ययान् लिखत।

**2 द्वयोः प्रश्नयोः उत्तरं लिखत ।** 8

1. ''कृत्वा पुंवत्पादमुच्चैर्भृगुभ्यः'' अत्रत्य छन्दसः नाम लक्षणं च विवृणुत ।
2. ''शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः'' अत्र अलङ्कारः कः? विवृणुत।
3. अव्ययीभावसमासं सोदाहरणं विवृणुत ।

**3 त्रयाणां तत्तल्लकारे लिखत ।** 9

1. एष्यति 2. हन्ति 3. अब्रवीत्
4. अस्तु 5. वर्तताम् 6. सुषुवे

**4 अन्यलिङ्गरूपाणि लिखत । (चतुर्णाम्)** 4

1. धार्यम् 2. लब्धः 3. स्मृतवान्
4. कुर्वाणम् 5. कारिकाः 6. श्रोता

**5 प्रयोगं व्यत्यस्यत । (द्वयोः)** 4

1. गुरुभिः उपदेशः क्रियते ।
2. वामनः बलिं वसुधां याचते ।
3. यूयं गीतां पठत ।
4. छात्रैः आम्रफलं खाद्यते ।



पश्चादनुवर्तते

6 **त्रयाणां विग्रहवाक्यं समासनाम च लिखत ।** 6

1. रामलक्ष्मणौ 2. पूजापुष्पम् 3. देवब्राह्मणः
4. पारेसमुद्रम् 5. कृष्णसर्पाः 6. सप्तर्षयः

7 **मातृभाषया अनुवदत ।** 5

1. न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायतां यान्ति ।
2. ऋत्विजः प्रज्वलिते यज्ञवह्नौ हवींषि जुह्वति ।
3. दुरात्मानं जरासन्धं निग्रहीतुं के वा शक्नुयुः ?
4. छात्राः यूयं सदा परेषां हितमेव कुरुत ।
5. किं यूयं सर्वे रामकथां शुश्रूषध्वे ?

**ख) संस्कृतभाषया अनुवदत** 5

1. ಗೊಲ್ಲರು ಹಸುಗಳಿಂದ ಹಾಲನ್ನು ಕರೆಯುತ್ತಾರೆ.
   Cowherds milk the milk from the cows.
2. ಅರಸನ ಸೇವಕರು ಭೂಮಿಯನ್ನು ಅಳತೆ ಮಾಡಿದರು.
   The King's servents measured the land.
3. ಸಜ್ಜನರು ಇತರರಿಗೆ ಸಹಾಯ ಮಾಡಿ ಪುಣ್ಯವನ್ನು ಸಂಪಾದಿಸುತ್ತಾರೆ.
   Good people, by helping others, earn punya.
4. ಗೋಪಿಕೆಯರು ಶ್ರೀಕೃಷ್ಣ ನಾಮವನ್ನು ಹಾಡುತ್ತಾ ಮೊಸರನ್ನು ಕಡೆಯುತ್ತಾರೆ.
   Gopikas churn the curds singing Sri Krishna's name..
5. ವಿಷ್ಣು ಧ್ರುವನಿಂದ ವರಗಳನ್ನು ಬೇಡಲ್ಪಡುತ್ತಾನೆ.
   Vishnu is asked boon by Dhruva.

* * * * *